Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# शेठ देवचंद लालभाई जैन पुस्तकोद्धार फण्ड.

जह्वेरी बजार–मुंबई.

संवत् १९८४

गोपीपुरा–सुरत.

६०००–४–२८.

श्रीकृष्ण दलींग प्रेस.
मुस्तफा मारकेट, धनजी स्ट्रीट, मुंबई.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीजिनाय नमः ॥

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ श्री चंद्रयशः चरित्रं ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय तथा भाषांतर करनार तथा छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज

(अन्वय तथा भाषांतरना प्रसिद्ध कर्ताए सर्व हक्क स्वाधीन राख्या छे.)

संवत १९८४ सने १९२८ वीर संवत् २४५४

किंमत रु. १-४-०

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीजैनभास्करोदय प्रिन्टींग प्रेसमां छाप्युं. जामनगर. ब्रांच नं. ३.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ जिनाय नमः ॥

॥ श्रीचारित्रविजय गुरुभ्यो नमः ॥

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ अथ श्री चंद्रयशः चरित्रं प्रारभ्यते ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय तथा भाषांतर करनार–पंडित श्रावक हीरालाल हंसराज (जामनगरवाळा)

श्रीसूर्यपुरमित्यस्ति पुरं यत्रास्तिको जनः । धत्ते धर्मनृपक्रीडाकल्पद्रुमवनश्रियम् ॥ १ ॥

अन्वयः—श्रीसूर्यपुरं इति पुरं अस्ति, यत्र आस्तिकः जनः धर्म नृप क्रीडा कल्पद्रुम वन श्रियं धत्ते ॥ १ ॥

अर्थः—श्रीसूर्यपुर एवा (नामनुं) नगर छे, के जेमां (रहेला) आस्तिक लोको धर्मरूपी राजाने क्रीडा करवाना कल्पवृक्षोना वन सरखी लक्ष्मीने धारण करे छे. ॥ १ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इहाजनि महीजानिर्महेन्द्र इति विश्रुतः। अन्तर्बहिर्द्विषज्जैत्रं शास्त्रं शस्त्रं च यो दधौ ॥ २ ॥

अन्वयः—इह महेंद्रः इति विश्रुतः महीजानिः अजनि, यः अंतः बहिः द्विषत् जैत्र शास्त्र च शस्त्र दधौ. ॥ २ ॥

अर्थः—ते नगरीमां "महेंद्र" एवा (नामथी) प्रसिद्ध थयेलो राजा हतो, के जे अंतरंग तथा बहारना शत्रुओने जीतनारां (अनुक्रमे) शास्त्र तथा शस्त्रने धारण करतो हतो. ॥ २ ॥

कुलोचितासु विद्यासु गुरुभिः कारितश्रमः। तस्याहं नन्दनश्चन्द्रयशा इत्यभिधामधाम् ॥ ३ ॥

अन्वयः–कुलोचितासु विद्यासु गुरुभिः कारितश्रमः अहं तस्य नंदनः, चंद्रयशाः इति अभिधां अधां. ॥ ३ ॥

अर्थः–कुलने लायक एवी विद्याओमां गुरुओए करावेल छे अभ्यास जेने, एवो आ हुं ते महेंद्रराजानो पुत्र छुं, तथा "चंद्रयशाः" एवां नामने हुं धारण करुं छुं. ॥ ३ ॥

हर्षी षोडशवर्षीयं सुधावर्षी गिरां भरैः। भवतापी कदापीदं मामुपांशु नृपो जगौ ॥ ४ ॥

अन्वयः–हर्षी, गिरां भरैः सुधावर्षी, भवतापी नृपः कदापि षोडशवर्षीयं मां उपांशु जगौ. ॥ ४ ॥

अर्थः—हर्ष पामेला, वचनोना समूहथी अमृतवर्षनारा, अने संसारथी विरक्त थयेला एवा ते राजाए एकदिवसे सोळ वर्षोनी वयवाळा एवा मने पासे बेसाडी कह्युं के, ॥ ४ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राज्यं संसारकान्तारे शृङ्गाटोऽयमटन्निह । कलितस्खलितः श्रीभिः पिशाचीभिः प्रपात्यते ॥ ५ ॥

अन्वयः—संसारकांतारे राज्यं शृंगाटः, इह अटन् अयं पिशाचीभिः श्रीभिः कलितस्खलितः प्रपात्यते ॥ ५ ॥

अर्थः—आ संसाररूपी वनमां राज्य (एक) चोवटा सरखुं छे, तेमां फरनारा आ जीवने पिशाची सरखी लक्ष्मी ठोकर खवरावी पाडी नाखे छे. ॥ ५ ॥

वहन्ति मणयो मोहमहीपमहदीपताम् । यल्लोभलोलुभा नाधः के पतन्ति पतङ्गवत् ॥ ६ ॥

अन्वयः—मणयः मोह महीप मह दीपतां वहंति, यल्लोभ लोलुभाः के पतंगवत् अधः न पतंति ? ॥ ६ ॥

अर्थः-रत्नो मोहराजाना तेजस्वी दीपकपणाने धारण करे छे, जेना लोभथी ललचायेला कया माणसोनो पतंगोनीपेठे अधःपात नथी थतो ? ॥ ६ ॥

तितीर्षवो भवाम्भोधिं बोधिबोहित्थवाहिताः । त्यजन्ति दूरतो मध्यभूधरानिव सिन्धुरान् ॥ ७ ॥

अन्वयः-बोधि बोहित्थ वाहिताः भवांभोधिं तितीर्षवः मध्यभूधरान् इव सिंधुरान् दूरतः त्यजंति. ॥ ७ ॥

अर्थः-ज्ञानरूपी वहाणमां बेठेला ( डाह्या माणसो ) संसारसमुद्रने तरी जवानी इच्छाथी वचे रहेला खराबाओसरखा, हाथीओने दूरथीज तजी दे छे. ॥ ७ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भवाटवीकुरङ्गाणां तुरङ्गाणां चलात्मनाम् । मोहश्रीदृग्विलासानां गोचरे नो चरेत्कृती ॥ ८ ॥

अन्वयः—भव अटवी कुरंगाणां, चलात्मनां, मोहश्री दृग्विलासानां तुरंगाणां गोचरे कृती नो चरेत् . ॥ ८ ॥

अर्थः—आ संसाररूपी वनमां हरिणसरखा, चपल तथा मोहलक्ष्मीनी आंखोना कटाक्षोसरखा एवा घोडाओनी नजीक (पण) चतुर माणस आवतो नथी. ॥ ८ ॥

मोहभूमिभुजङ्गस्य जङ्गमास्थानमण्डपम् । छायाछलात्तले व्याप्तं पातकैस्तस्य सेवकैः ॥ ९ ॥

छत्रं विवेकमार्तण्डप्रकाशभरनाशकम् । न कोऽपि सेवते तादृग्जडताचकितः कृती ॥ १० ॥ युग्मम् ॥

अन्वयः—मोह भूमिभुजंगस्य जंगम आस्थान मंडपं, छायाछलात् तले तस्य सेवकैः पातकैः व्याप्तं, ॥ ९ ॥ विवेक मार्तंड प्रकाश भरनाशकं छत्रं तादृक् जडता चकितः कः अपि कृती न सेवते. ॥ १० ॥ युग्मं ॥

अर्थः—मोहरूपी राजाना जंगम सभामंडप सरखा, तथा नीचेना भागमां छायाना मिषथी ते मोहराजाना सेवको सरखा पापोवडे व्याप्त थयेला, ॥ ९ ॥ अने विवेकरूपी सूर्यना प्रकाशना समूहने आच्छादित करनारा, एवा छत्रने तेवी रीतनां (तेनां) जड-पणाथी चकित थयेलो, एवो कोइ पण चतुर माणस सेवे नही. ॥ १० ॥ युग्मं ॥

रत्नान्यगाधवर्तीनि स्त्रियो भान्ति भवार्णवे । पुमान्मजत्यनुन्मज्जो यत्पाणिग्रहणाग्रही ॥ ११ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अन्वयः–भव अर्णवे अगाधवर्तीनि रत्नानि स्त्रियः भांति, यत् पाणि ग्रहण आग्रही पुमान् अनुन्मज्जः मज्जति. ॥ ११ ॥

अर्थः—आ संसाररूपी महासागरमां अत्यंत उंडां रहेलां रत्नोसरखी स्त्रीओ शोभे छे, के जेना ग्रहणमाटे (हाथमां लेवामाटे) आग्रह युक्त थयेलो पुरुष पाछो उपर न आवी शके, ए रीते (तेमां) बुडी जाय छे. ॥ ११ ॥

एतदीदृग्विधं मोक्तुमशक्तः सकलः कृती । असक्त एव सेवेत शीतभीत इवानलम् ॥ १२ ॥

अन्वयः–ईदृग्विधं एतत् मोक्तुं अशक्तः सकलः कृती, शीतभीतः अनलं इव असक्तः एव सेवेत. ॥ १२ ॥

अर्थः—एवी रीतनां आ सांसारिक विषयोने छोडवाने अशक्त थयेला सघळा डाह्या माणसो, ठंडीथी डरेलो माणस (छेटेथी) जेम अग्निने सेवेछे, तेम तेमां आसक्ति राख्या विनाज (विषयोने) सेवे छे. ॥ १२ ॥

तदिदानीमहं मोहादतो निर्गन्तुमुद्यतः । राज्ञां राज्यश्रमः सूनुयौवनान्तो हि नः कुले ॥ १३ ॥

अन्वयः—तत् इदानीं अहं अतः मोहात् निर्गंतुं उद्यतः, हि नः कुले राज्ञां राज्यश्रमः सूनु यौवन अंतः ॥ १३ ॥

अर्थः—माटे हवे हुं (संसारनी) आ मोहजाळमांथी निकळवाने उत्सुक थयेलो छुं, केमके आपणा कुळमां थयेला राजाओ पुत्रना यौवनसुधी राज्यनो श्रम उठावे छे. ॥ १३ ॥

तातो मामिव वत्स त्वां स्वस्थानेऽस्मिन्निवेश्य तत् । मोहवीरस्य कारातः संसारान्निरयेऽधुना ॥ १४ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अन्वयः—तत् (हे) वत्स! मां इव तातः, त्वां अधुना अस्मिन् स्वस्थाने निवेश्य मोहवीरस्थ कारातः संसारात् निरये. ॥ १४ ॥
अर्थः-माटे (हे) वत्स! मने जेम (मारा) पिता, तेम तने हमणा आ मारी गादीपर बेसाडीने मोहसुभटना केदखाना सरखा (आ) संसारमांथी निकळी जाउं छु. ॥ १४ ॥

इत्युक्त्वा बलतो राज्याभिषेकं विरचय्य मे। नृपो लक्ष्यतपोलक्ष्मीयौवनं प्रययौ वनम् ॥ १५ ॥

अन्वयः—इति उक्त्वा बलतः मे राज्य अभिषेकं विरचय्य नृपः लक्ष्य तपः लक्ष्मी यौवनं वनं प्रययौ. ॥ १५ ॥
अर्थः—एम कहीने बळात्कारे मारो राज्याभिषेक करावीने ते राजा, ज्यां तपरूपी लक्ष्मीनुं यौवन देखाय छे, एवा वनप्रत्ये चाल्या गया. ॥ १५ ॥

परिपालयतो राज्यं ममापि क्ष्मापशिक्षया। राज्ञी रत्नावली नाम प्राणेभ्योऽपि प्रियाभवत् ॥ १६ ॥

अन्वयः-क्ष्माप शिक्षया राज्यं परिपालयतः मम अपि प्राणेभ्यः अपि प्रिया रत्नावलीनाम राज्ञी अभवत्. ॥ १६ ॥
अर्थः-राजानी (मारा पिताजीनी) शिखामण मुजब राज्यनुं पालन करता एवा मने पण, प्राणथी पण वहाली रत्नावली नामनी राणी थइ. ॥ १६ ॥

भवानुबन्धिनीं जानन्नपि तां तद्गतं मनः। आक्रष्टुं न क्षमोऽभूवं पङ्कमग्नमिव द्विपम् ॥ १७ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अन्वयः—तां भवानुबंधिनीं जानन् अपि, पंकमग्नं द्विपं इव तद्गतं मनः आक्रष्टुं क्षमः न अभूवं. ॥ १७ ॥

अर्थः—तेणीने संसार (वधवानां) कारणरूप जाणतां छतां पण कादवमां बुडेला हाथीनीपेठे, तेणीमां चोटेलां (मारां) मनने खेंची कहाडवाने (हुं) समर्थ थयो नही. ॥ १७ ॥

लग्नं तस्यां तथा प्रेमवज्रलेपेन मन्मनः । न यथाकर्षि राज्यश्रीधुरीणैरपि वारणैः ॥ १८ ॥

अन्वयः—तस्यां प्रेम वज्र लेपेन मन्मनः तथा लग्नं, यथा राज्य श्री धुरीणैः वारणैः अपि न आकार्षि. ॥ १८ ॥

अर्थः—ते राणीमां प्रेमरूपी वज्रलेपथी मारुं मन एवुं तो चोटी गयुं के, राज्यलक्ष्मीना भारने खेंचनारा हाथीसरखा (मंत्रीओ) पण तेने खेंचीने कहाडी शक्या नही. ॥ १८ ॥

तस्यामुच्छृङ्खलं कामपिशाचेन मनो मम । गृहीतं हन्त नामोचि मन्त्रज्ञैरपि मन्त्रिभिः ॥ १९ ॥

अन्वयः—हंत तस्यां उच्छृंखलं कामपिशाचेन गृहीतं मम मनः मंत्रज्ञैः मंत्रिभिः अपि न अमोचि. ॥ १९ ॥

अर्थः—अरेरे! ते राणीमांज आसक्त थयेलां, अने कामदेवरूपी पिशाचे वश करेलां मारां मनने मंत्रोना जाणनारा मंत्रीओ पण छोडावी शक्या नही. ॥ १९ ॥

तदेकायत्तचित्तस्य राज्यश्रीरीर्ष्यया मम । परहस्तं यती तस्थौ वृद्धामात्यह्रिया यदि ॥ २० ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्वयः-तत् एक आयत्त चित्तस्य मम राज्यश्रीः ईर्ष्यया परहस्तं यती यदि वृद्ध अमात्य ह्रिया तस्थौ. ॥ २० ॥

अर्थः-तेणीमांज फक्त आसक्त छे मन जेनुं, एवो जे हुं, तेनी राज्यलक्ष्मी ईर्ष्याथी परना हाथमां जती जती फक्त वृद्ध मंत्रीनी शरमथी रही गइ. ॥ २० ॥

मानसे मानसेविन्या तया नित्याश्रितेऽविशन् । स्त्रीसंघट्टभयेनेव न धर्मगुरवोऽपि मे ॥ २१ ॥

अन्वयः-मानसेविन्या तया नित्याश्रिते मे मानसे स्त्रीसंघट्ट भयेन इव धर्म गुरवः अपि न अविशन् . ॥ २१ ॥

अर्थः-सन्मानपूर्वक सेवाती एवी ते राणीवडे हमेशां वशीभूत थयेलां मारां मनमां, जाणे स्त्रीना स्पर्शना भयथी होय नही ! तेम गुरुओ पण प्रवेश करी शक्या नही. ॥ २१ ॥

इत्यनन्यमना धन्यंमन्यस्तन्न्यस्तलोचनः । अमन्ये मान्मथं पर्व निर्वाणपदमप्यदः ॥ २२ ॥

अन्वयः-इति अनन्यमनाः तन्न्यस्त लोचनः (अहं) धन्यंमन्यः निर्वाण पदं अपि अदः मान्मथं पर्व अमन्ये. ॥ २२ ॥

अर्थः-ए रीते बीजे क्यांय पण मन राख्या विना फक्त ते राणीमांज दृष्टि राखीने हुं (पोताने) भाग्यशाली मानतो थको मोक्षने पण आ कामसेवानुं पर्व मानवा लाग्यो. ( अर्थात् आ कामभोगज मोक्ष छे, एम मानवा लाग्यो. ) ॥ २२ ॥

अन्यदा मदनानन्दरसनिद्रावशंवदः । स्वमपश्यमहं स्वप्ने मुक्तागिरिशिरश्चरम् ॥ २३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अन्वयः–अन्यदा मदन आनंद रस निद्रा वशंवदः अहं स्वप्ने मुक्तागिरि शिरः चरं अपश्यं. ॥ २३ ॥

अर्थः–एक दिवसे कामविलासना आनंदरसथी निद्रावश थयेलो हुं स्वप्नमां पोताने सिद्धगिरिना शिखरपर चालतो जोवा लाग्यो.

तस्यामुन्निद्रनिद्रायामुन्निद्रोऽहं तदा हृदा । अचिन्तयमिदं चिन्तान्तरावसरशालिना ॥ २४ ॥

अन्वयः–तस्यां उन्निद्र निद्रायां तदा उन्निद्रः अहं चिंता अंतर अवसरशालिना हृदा अचिंतयं. ॥ २४ ॥

अर्थः–ते राणी हजु भर उंघमां हती, त्यारे जागी उठेलो हुं, बीजां चिंतवनमाटे (मळेला) अवसरथी शोभता एवा हृदयवडे हुं विचारवा लाग्यो के, ॥ २४ ॥

स्वप्नः सर्वोत्तमस्तावन्मुक्तेर्लाभं दिशत्यसौ । किं तु कान्तावशहृदः क तत्संभावनापि मे ॥ २५ ॥

अन्वयः—सर्वोत्तमः असौ स्वप्नः तावत् मुक्तेः लाभं दिशति, किंतु कांता वश हृदः मे तत्संभावना अपि क्व ? ॥ २५ ॥

अर्थः—सर्वथी उत्तम एवुं आ स्वप्न तो मुक्तिनो लाभ सूचवे छे, परंतु स्त्रीने वश हृदयवाळा एवा मने ते मुक्तिना लाभनो संभव पण क्यांथी होय ? ॥ २५ ॥

किंकुर्वत्काश्चना कान्तिस्तृणन्मत्तगजा गतिः । दासदश्वा दृगुल्लासाः कर्करन्मणयो नखाः ॥ २६ ॥

चेटत्कर्पूरकस्तूरीमुख्यगन्धो मुखानिलः । यस्या रेणुकणाद्दव्यदुकूला दशनद्युतिः ॥ २७ ॥ युग्मं ॥

अन्वयः–यस्याः कांतिः किंकुर्वत्कांचना, गतिः तृणन्मत्तगजा, दृगुल्लासाः दासदश्वाः, नखाः कर्करन्मणयः, ॥ २६ ॥ मुखा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निलः चेटत्कर्पूर कस्तूरीमुख्य गंधः, दशनद्युतिः रेणुकणत् दिव्यदुकूला ॥ २७ ॥ युग्मं ॥

अर्थः–जे आ राणीनी कांति तो सुवर्णने कंइ हिसाबमां गणती नथी, तेणीनी गति तो मदोन्मत्त हाथीने पण तृणसमान लेखेछे, तेणीना नेत्रोना (चपल) विलासो तो घोडाओने पण नोकर गणे छे, अने तेओना नखो तो मणिओने कांकरासरखा लेखेछे, ॥२६॥ तेना मुखना वायुए तो कपूर तथा कस्तूरीआदिकनी सुगंधिने पण चाकररूप गणी छे, तथा तेना दांतनी कांतिए तो दिव्य श्वेत रेशमी साडीने पण रजकणसरखी लेखी छे. ॥ २७ ॥ युग्मं ॥

**युक्तं तयैकया हृन्मे राज्यभोगे श्लथीकृतम् । एतद्भोगं श्लथीकर्तुं कोऽभ्युपायोऽस्तु मेऽधुना ॥ २८ ॥**

अन्वयः—तया एकया युक्तं मे हृद् राज्य भोगे श्लथीकृतं, एतद्भोग श्लथीकर्तुं अधुना मे कः अभ्युपायः अस्तु. ॥ २८ ॥

अर्थः—ते एक राणी साथे जोडायेलुं मारुं मन राज्यकार्यमां नरम पडी गयुं छे, ( माटे ) तेणीना भोगविलासने नरम पाडवा माटे हवे मारे कयो उपाय शोधवो ? ॥ २८ ॥

**किमस्या न महानीलीलीलां दधतु कुन्तलाः । हृद्वर्तिभिः कलुषितं श्रुतं मे क्षीरहारि यैः ॥ २९ ॥**

अन्वयः—अस्याः कुंतलाः किं महानीली लीलां न दधतु ? हृद्वर्तिभिः यैः मे क्षीरहारि श्रुतं कलुषितं ॥ २९ ॥

अर्थः—आ राणीना (मस्तकपरना) केशो शुं पाकी गळीनी क्रीडाने (श्यामपणाने) नथी धारण करता? (केमके मारा) हृदयमां रहेला एवा जे केशोए मारुं दूधसरखुं मनोहर ( उज्ज्वल ) ज्ञान मलीन कर्युं छे. ॥ २९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किममुष्या मुखं नेन्दुर्यल्लीलामीलितं मम । विवेकमब्जवद्वीक्ष्य हंसगौरैर्गतं गुणैः ॥ ३० ॥

अन्वयः—अमुष्याः मुखं किं इन्दुः न? यल्लीला मीलितं अब्जवत् मम विवेकं वीक्ष्य हंस गौरैः गुणैः गतं. ॥ ३० ॥

अर्थः—आ राणीनुं मुख शुं चंद्र नथी? (छे) केमके जेना प्रभावथी मीचाइ गयेलां कमल सरखो मारो विवेक जोइने हंस-सरखा निर्मल गुणो (मारामांथी) चाल्या गया छे. ॥ ३० ॥

अस्या नीलाब्जसदृशो दृशो नित्यधृतस्मिताः । शंसन्ति तत्त्वविज्ञानभानुमस्तमितं मयि ॥ ३१ ॥

अन्वयः—नित्य धृत स्मिताः नीलाब्ज सदृशः अस्याः दृशः मयि तत्त्व विज्ञान भानुं अस्तं इतं शंसंति ॥ ३१ ॥

अर्थः—हमेशां विकस्वर रहेती, तथा (चंद्र विकासी) लीलां कमलो सरखी आ राणीनी आंखो, मारां तत्त्वज्ञानरूपी सूर्यने अस्त पामेलो सूचवे छे. ॥ ३१ ॥

अधरो मधुमाधुर्यधुर्योऽस्या यद्वशं भृशम् । प्रमत्तं मन्मनोऽमुञ्चन्दूरतः सूरयो रयात् ॥ ३२ ॥

अन्वयः—अस्याः अधरः मधु माधुर्य धुर्यः, यद्वशं भृशं प्रमत्तं मन्मनः सूरयः रयात् दूरतः अमुंचन्, ॥ ३२ ॥

अर्थः—आ राणीना होठ मधनी पेठे (मदिरानी पेठे) मीठाशमां अग्रेसर छे, के जेने वश थइ अत्यंत उन्मत्त (प्रमादी) थयेलां मारां मनने धर्माचार्योए तो दूरथीज तजी दीधुं छे. ॥ ३२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतस्याः कम्बुवत्कण्ठो गम्भीरमधुरस्वरः । कृत्स्नानां मम कृत्यानां प्रयाणायैव कल्पितः ॥ ३३ ॥

अन्वयः—एतस्याः कंबुवत् गंभीर मधुर स्वरः कंठः मम कृत्स्नानां कृत्यानां प्रयाणाय एव कल्पितः ॥ ३३ ॥

अर्थः—आ राणीनो शंख जेवो गंभीर, अने मनोहर नादवाळो कंठ मारां सघळां (उत्तम) कार्योनां प्रयाणमाटेज जणायेलो छे. (केमके प्रयाणसमये शंख वगाडवामां आवे छे. ) ॥ ३३ ॥

अप्येतन्मृदुदोर्नालपाशबद्धं निजं मनः । नाहं मोचयितुं शक्तो धिगसारनराग्रणीम् ॥ ३४ ॥

अन्वयः—एतत् मृदु दोर्नाल पाश बद्धं अपि निजं मनः अहं मोचयितुं शक्तः न, असार नर अग्रणीं धिक् ॥ ३४ ॥

अर्थः—आ राणीना कोमल हस्तनालरूपी पाशथी बंधायेलां, एवां पण मारां मनने हुं छोडववाने शक्तिमान थतो नथी, माटे निर्बल माणसोना सरदार एवा (मने) धिक्कार छे. ॥ ३४ ॥

लीलयैव विलङ्घेऽहमहो भवमहाटवीम् । तस्यामस्यास्तु दुर्लङ्घ्यो वेणिदण्डो हृदापि मे ॥ ३५ ॥

अन्वयः—अहो ! भवमहाटवीं अहं लीलया एव विलंघे, तस्यां अस्याः वेणिदंडः तु मे हृदा अपि दुर्लंघ्यः ॥ ३५ ॥

अर्थः—अहो ! संसाररूपी ( आ ) महावनने तो हुं रमतमात्रमांज ओळंगी जाउं एम छउं, ( परंतु ) तेमां रहेलो आ राणीनो वेणीदंड( गुंथेलो लांबो चोटलो) तो मारां मनवडे पण ओळंगावो मुश्केल छे. ॥ ३५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सर्वतोऽपि भवाम्भोधिः सुतरः सुतरामसौ । इहैतन्नाभिगम्भीरावर्तबन्धस्तु दुस्तरः ॥ ३६ ॥

अन्वयः—असौ भव अंभोधिः सर्वतः अपि सुतरां सुतरः, इह एतत् नाभि गंभीर आवर्तबंधः तु दुस्तरः ॥ ३६ ॥

अर्थः–आ संसाररूपी महासागर तो सर्व बाजुएथी पण सहेजमां सुखें तराय एवो छे, परंतु तेमां रहेलो आ राणीनी नाभिरूपी उडो भमरीओ (बंध कुओ) तो तरावो मुश्केल छे. ॥ ३६ ॥

एतत्सिञ्जानमञ्जीरगतचित्तस्य विस्मृतौ । हंसस्येवामलौ पक्षौ धिग्ममोर्ध्वगतिक्षमौ ॥ ३७ ॥

अन्वयः—धिक् ! एतत्सिंजान मंजीर गत चित्तस्य मम हंसस्य इव ऊर्ध्व गति क्षमौ अमलौ पक्षौ विस्मृतौ. ॥ ३७ ॥

अर्थः—धिक्कार छे ! के, आ राणीना झमकता झांझरोमां आसक्त मनवाळा एवा मने, हंसनीपेठे उंचे गमन करवामां समर्थ एवा मारा माता पिता संबंधी बन्ने निर्मल पक्षो ( पक्षे–पांखो ) विस्मरण थयां. ॥ ३७ ॥

इत्यादिध्यानसंलीने मयि स्वं निन्दति स्वयम् । अपठन्प्रातरुत्तालस्वरं वैतालिका बहिः ॥ ३८ ॥

अन्वयः—इत्यादि ध्यान संलीने मयि, स्वयं स्वं निंदति, प्रातः बहिः वैतालिकाः उत्तालस्वरं अपठन् ॥ ३८ ॥

अर्थः—इत्यादिक विचारमां गरकाव थइने हुं पोतानी मेळेज पोताने (ज्यारे) निंदतो हतो, त्यारे प्रभात थवाथी बहार रहेला स्तुतिपाठको उंचे स्वरे बोलवा लाग्या के, ॥ ३८ ॥

निद्रां नरेन्द्र मुञ्चाशु बोधस्य समयो ह्यसौ । हन्तुं तमोऽभ्ययाद्भानुः संमोहमिव सद्गुरुः ॥ ३९ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्वयः—(हे) नरेन्द्र ! आशु निद्रां मुंच, हि असौ बोधस्य समयः, सद्गुरुः संमोहं इव तमः हंतुं भानुः अभ्ययात् ॥ ३९ ॥

अर्थः—हे राजन् ! तुरत निद्रानो त्याग करो ? केमके आ जागवानो समय छे, सद्गुरु जेम मोहने, तेम अंधकारने हणवाने सूर्य नजीक आवेलो छे. ॥ ३९ ॥

**ऐनामुपश्रुतिं मुक्तिसूचिनीं बन्दिनां गिरम् । स्वप्नसंवादिनीं जानन्नानन्दमहमासदम् ॥ ४० ॥**

अन्वयः—एनां उपश्रुतिं बंदिनां गिरं मुक्तिसूचिनीं स्वप्नसंवादिनीं जानन् अहं आनंदं आसदं. ॥ ४० ॥

अर्थः—(एवी रीतनी) आ कानमां पडेली ते स्तुतिपाठकोनी वाणीने मुक्ति सूचवनारी, तथा स्वप्नने मळती आवती जाणीने हुं आनंद पाम्यो. ॥ ४० ॥

**क्षणेऽस्मिञ्जाग्रती साग्रे प्रेक्ष्य मां प्रथमोत्थितम् । ह्रीनम्रास्या वचः किंचिन्नोचे मयि चटूचितम् ॥४१॥**

अन्वयः-अस्मिन् क्षणे जाग्रती सा प्रथम उत्थितं मां अग्रे प्रेक्ष्य ह्री नम्र आस्या मयि किंचित् उचितं चटु न ऊचे. ॥४१॥

अर्थः-ते वखते जागी उठेली एवी ते राणी, (पोताथी) पहेलां उठेला एवा मने आगळ (बेठेलो) जोइ, शरमने लीधे नीचुं जोइ रही, तथा मारामते कंइ पण योग्य चाटु वचन बोली नहीं. ॥ ४१ ॥

**अगाधबोधिदुग्धाब्धिसंमुखान्तरचक्षुषा । समभाषि मयाप्येषा न किंचिन्नर्मभाषया ॥ ४२ ॥**

अन्वयः-अगाध बोधि दुग्ध अब्धि संमुख आंतर चक्षुषा मया अपि एषा नर्मभाषया किंचित् न समभाषि. ॥ ४२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थः-ज्ञानरूपी उंडा क्षीरसमुद्रनी सन्मुख थयेल छे अंतरंग चक्षु जेनां, एवा में पण तेणीने रसुजी भाषावडे कंइ पण वचन कह्युं नही. ॥ ४२ ॥

**अथाग्रभागमागत्य प्रणिपत्य च मां मुदा । व्याजहार प्रतीहारी हारीकृतरदद्युतिः ॥ ४३ ॥**

अन्वयः—अथ हारीकृत रद द्युतिः प्रतीहारी अग्रभागं आगत्य, च मां मुदा प्रणिपत्य व्याजहार. ॥ ४३ ॥

अर्थः—एवामां मनोहर करेल छे दांतोनी कांति जेणीए एवी प्रतीहारीए आगळ आवीने, तथा मने नमीने कह्युं के, ॥ ४३ ॥

**देव विज्ञपयत्येवममात्यो मतिसागरः । चिराद्भवन्मुखालोककौतुकी सेवको जनः ॥ ४४ ॥**

अन्वयः-(हे) देव ! मतिसागरः अमात्यः एवं विज्ञपयति, सेवकः जनः चिरात् भवन्मुख आलोक कौतुकी. ॥ ४४ ॥

अर्थः—हे स्वामी ! मतिसागर मंत्री एम विनंति कहेवरावे छे के, (सर्व) सेवकलोको घणा समयथी आपना मुखनुं दर्शन करवाने उत्कंठित थया छे. ॥ ४४ ॥

**इति तद्वचनान्तेऽहं नित्यप्रत्यूषकृत्यकृत् । सेवितां सेवकस्तोमैः सभाभुवमभासयम् ॥ ४५ ॥**

अन्वयः—इति तद्वचन अंते नित्य प्रत्यूषकृत्यकृत् अहं सेवकस्तोमैः सेवितां सभाभुवं अभासयं. ॥ ४५ ॥

अर्थः—एवी रीतनां तेणीना वचनने अंते (ते प्रतीहारीनुं वचन सांभळ्याबाद) प्रभातकाळनुं नित्यकर्म करीने हुं सेवकोना समूहोथी सेवायेली राजसभाने शोभाववा लाग्यो, (त्यां गयो. ) ॥ ४५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततः प्रणमतः सर्वानुर्वीनाथान्निरूपयन् । वीक्ष्य कस्यापि हस्तेऽब्जं तामब्जदृशमस्मरम् ॥ ४६ ॥

अन्वयः-ततः प्रणमतः सर्वान् ऊर्वीनाथान् निरूपयन्, कस्य अपि हस्ते अब्जं वीक्ष्य अब्जदृशं तां अस्मरं ॥ ४६ ॥

अर्थः—पछी नमता एवा सघळा जमीनदारोने जोतोथको, कोइकना हाथमां कमळने जोइने कमलसरखां नेत्रोवाळी एवी ते (मारी) राणीने (हुं) याद करवा लाग्यो. ॥ ४६ ॥

वचोवीचिषु पीयूषसध्रीचीषु मनीषिणाम् । तदा तद्विरहोत्तप्तं न रेमे तत्र मे मनः ॥ ४७ ॥

अन्वयः-तदा तत्र मनीषिणां पीयूषसध्रीचिषु वचोवीचीषु तद्विरह उत्तप्तं मे मनः न रेमे ॥ ४७ ॥

अर्थः-वळी ते वखते त्यां विद्वान कविओनां अमृतसरखां वचनरचनारूप मोजांओमां (पण) ते राणीना विरहथी तपी निकळेलुं मारुं मन आनंदित (शीतल) थयुं नही. ॥ ४७ ॥

उत्कः क्षिपाम्यहं चक्षुर्यावदन्तः पुरं प्रति । तावच्चारुतनुं कंचिदुदश्वदतुलद्युतिम् ॥ ४८ ॥

गाढग्रन्थिपरीधानं कटिवेष्टोत्तरीयकम् । अंसलम्बितनिस्त्रिंशमुरोबद्धासिधेनुकम् ॥ ४९ ॥

बिभ्राणं दक्षिणे पाणौ ताम्बूलदलमण्डलीम् । वामे तया तु हर्षिण्या कृतहस्तावलम्बनम् ॥ ५० ॥

चक्षुषा धैर्यधुर्येण पश्यन्तं मामवज्ञया । नरं निरूपयामास निर्गच्छन्तं द्रुतैः पदैः ॥ ५१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अन्वयः—उत्कः अहं यावत् अंतः पुरं प्रति चक्षुः क्षिपामि तावत् कंचित् चारु तनुं, उदंचत् अतुलद्युतिं ॥ ४८ ॥ गाढ ग्रंथि परीधानं, कटि वेष्ट उत्तरीयकं, अंस लंबित निस्त्रिंशं, उरः बद्ध असिधेनुकं, ॥ ४९ ॥ दक्षिणे पाणौ तांबूल दल मंडलीं बिभ्राणं वामे तु हर्षिण्या तया कृत हस्त अवलंबनं, ॥ ५० ॥ धैर्य धुर्येण चक्षुषा अवज्ञया मां पश्यंतं, द्रुतैः पदैः निर्गच्छंतं नरं निरूपयामास.

अर्थः—उत्कंठित थयेलो एवो हुं जेवामां जनानखाना तरफ नजर करुं छुं, तेवामां कोइक मनोहर शरीरवाळा, देदीप्यमान अनुपम कांतिवाळा, ॥ ४८ ॥ मजबूत गांठ बांधीने पहेरेल धोतीवाळा, केडे वींटेल दुपट्टावाळा, खभे लटकावेल शमशेरवाळा, छातीपर बांधेल कटारवाळा, ॥ ४९ ॥ जमणा हाथमां तांबूल पत्रोनी श्रेणिने धारण करनारा, हर्ष पामेली एवी ते राणीए पोताना हाथथी पकडेलो छे डाबो हाथ जेनो एवा, ॥ ५० ॥ हिम्मत भरेली दृष्टिथी तिरस्कारपूर्वक मारीतरफ जोता, तथा उतावळे पगले (त्यांथी) निकळता एवा एक पुरुषने में जोयो. ॥ ५१ ॥ चतुर्भिः कलापकं ॥

**क एष क नयत्येतामिति कोपारुणेक्षणम् । मामित्यूचे हसन्ती सा तं स्थिरीकृत्य सत्वरम् ॥ ५२ ॥**

अन्वयः-एषः कः ? एतां क्व नयति ? इति कोप अरुण ईक्षणं मां हसंती तं सत्वरं स्थिरीकृत्य सा इति ऊचे. ॥ ५२ ॥

अर्थ--आ कोण हशे ? आ मारी राणीने क्यां लेइ जाय छे ? एवा विचारथी क्रोधवडे लाल आंखोवाळो जे हुं, तेनी हांसी करती थकी, ते पुरुषने तुरत हिम्मत आपीने ते राणी (मने) एम कहेवा लागी के, ॥ ५२ ॥

**अहं महापातकिना बन्दीचक्रे चिरं त्वया । प्रयामि संप्रति न्यस्य त्वदीयहृदये पदम् ॥ ५३ ॥**

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्वयः—महापातकिना त्वया अहं चिरं बंदीचक्रे, संमति त्वदीय हृदये पदं न्यस्य प्रयामि. ॥ ५३ ॥

अर्थः-महा पापी एवा तें मने घणा काळथी केद करीने राखी हती, हवे आ वखते तारी छाती पर पग मूकीने हुं नाशी जाउं छुं.

ईदृक्तद्वचनक्रुद्धो भटानित्यहमभ्यधाम्। ध्रियतां ध्रियतामेष हन्यतां हन्यतामयम् ॥ ५४ ॥

अन्वयः—ईदृक् तत् वचन क्रुद्धः अहं भटान् इति अभ्यधां, एषः ध्रियतां ध्रियतां ? अयं हन्यतां हन्यतां ? ॥ ५४ ॥

अर्थः—एवीरीतनां तेणीना वचनोथी क्रोध पामेला एवा में, ( मारा ) सुभटोने एवो हुकम कर्यो के, आने पकडो पकडो ? तथा एने मारो मारो ? ॥ ५४ ॥

ततो मरुत्वरातारप्रचरच्चरणः क्षणात् । तया सह स हर्षिण्याऽगमद्गृहबहिर्महीम् ॥ ५५ ॥

अन्वयः—ततः मरुत् त्वरा तार प्रचरत् चरणः सः हर्षिण्या तया सह क्षणात् गृहबहिर्महीं अगमत् . ॥ ५५ ॥

अर्थः—एछी वायु सरखा वेगथी उतावळो चालवाळो ते पुरुष, खुशी थयेली एवी (मारी) ते राणीसहित क्षणवारमां तो घरनी (अंतःपुरनी) बहार निकळी गयो. ॥ ५५ ॥

एष यात्येष यातीति प्रध्वानैरनुधावताम् । पुरःस्था अपि पौरास्तं न धर्तुं शेकुरादृताः ॥ ५६ ॥

अन्वयः—एषः याति, एषः याति, इति प्रध्वानैः अनुधावतां पुरःस्थाः आदृताः पौराः अपि तं धर्तुं न शेकुः. ॥ ५६ ॥

अर्थः—आ जाय, आ जाय, एम बूमो मारीने तेनी पाछळ दोडनाराओपाना अगाडी रहेला, अने तैयार थइ उमेला, एवा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नागरीको पण तेने पकडी शक्या नही. ॥ ५६ ॥

उत्फुल्लफेनया धावद्धयानां सेनया मया । मनसेवेन्द्रियग्रामः सोऽन्वगामि प्रवेगिना ॥ ५७ ॥

अन्वयः–उत्फुल्ल फेनया धावत् हयानां सेनया ( सह ) मनसा इन्द्रिग्रामः इव, प्रवेगिना मया सः अन्वगामि. ॥ ५७ ॥

अर्थः—मुखमां आवेलां फीणवाळी, एवी दोडता घोडाओनी सेना सहित, मन जेम इन्द्रियोना समूहनी पाछळ जाय, तेम अत्यंत वेगवाळो एवो हुं तेनी पाछळ जवा लाग्यो. ॥ ५७ ॥

पर्यन्तं पर्यटन्पुर्यास्तदन्वेषपरः पुरः । आलोकयं चमूं कांचित्काञ्चनोद्भासिभूषणाम् ॥ ५८ ॥

अन्वयः––तत् अन्वेषपरः पुर्याः पर्यंतं पर्यटन् ( अहं ) पुरः कांचन उद्भासि भूषणां कांचित् चमूं आलोकयं ॥ ५८ ॥

अर्थः—तेने शोधवामां तत्पर थयेला, (अने तेथी) नगरनी आसपास भमता एवा में आगळ सुवर्णना तेजस्वी आभूषणोवाळी कोइक सेनाने जोइ. ॥ ५८ ॥

तदन्तर्भद्रदन्तीन्द्रपृष्ठारूढस्य कस्यचित् । करे तेनार्पि सा सोऽपि तां वामाङ्के न्यवीविशत् ॥ ५९ ॥

अन्वयः–तत् अंतः भद्र दंतींद्र पृष्ठ आरूढस्य कस्यचित् करे तेन सा अर्पि, सः अपि तां वामांगे न्यवीविशत् ॥ ५९ ॥

अर्थः–ते सेनानी वचमां रहेला भद्रजातिना गजराजनी पीठपर बेठेला कोइक माणसना हाथमां ते माणसे तेणीने सोंपी, अने तेणे पण ते मारी राणीने ( पोताना ) खोळाना डाबी तरफना भागपर बेसाडी. ॥ ५९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सा च वाचः सुदूरस्थं मां वीक्ष्य स्त्रीत्वलम्पटा । तदङ्गालिङ्गिनी वामकराङ्गुष्ठमनर्तयत् ॥ ६० ॥

अन्वयः—च मां वाचः सुदूरस्थं वीक्ष्य स्त्रीत्वलंपटा सा तत् अंग आलिंगिनी वाम कर अंगुष्ठं अनर्तयत् . ॥ ६० ॥

अर्थः-वळी मने वचनथी घणे दूर रहेलो जोइने स्त्री चरित्रमां प्रवीण एवी ते राणी ते पुरुषना शरीरने आलिंगन करीने (मारा तरफ पोताना) डाबा हाथनो अंगुठो नचाववा लागी. ॥ ६० ॥

तन्निरीक्ष्य विलक्षोऽहमेतच्चेतस्यचिन्तयम् । अहो महोदधिर्मोहमहिम्नां महिलाजनः ॥ ६१ ॥

अन्वयः-तत् निरीक्ष्य विलक्षः अहं चेतसि एतत् अचिंतयं, अहो ! महिलाजनः मोह महिम्नां महोदधिः ! ॥ ६१ ॥

अर्थः-ते जोइ विलखो थयेलो हुं मनमां एम विचारवा लाग्यो के, अहो ! स्त्रीओ तो मोहना प्रभावोना महासागर सरखी जणायछे

मदिराया गुणज्येष्टा लोकद्वयविरोधिनी । कुरुते दृष्टमात्रापि महिला ग्रहिलं जनम् ॥ ६२ ॥

अन्वयः—महिला मदिरायाः गुण ज्येष्टा, लोक द्वय विरोधिनी, दृष्टमात्रा अपि जनं ग्रहिलं कुरुते ॥ ६२ ॥

अर्थः-स्त्री (खरेखर) मदिराथी पण चडीयाता प्रभाववाळी, तथा बन्ने लोक बगाडनारी छे, (केमके) दर्शनमात्रथीज (ते) पुरुषने गांडो बनावी मेले छे. ॥ ६२ ॥

परापकाराहंकारि किं विषं सन्ति हि स्त्रियः । यत्सेवनभवस्तापः परत्रापि न शाम्यति ॥ ६३ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्वयः-पर अपकारी अहंकारि विषं किं? हि स्त्रियः संति, यत् सेवन भवः तापः परत्र अपि न शाम्यति. ॥ ६३ ॥

अर्थः-परन्तु बुरुं करवामां गर्व धारण करनारुं कयुं झेर छे? तो के खरेखर स्त्रीओ (तेवां झेर रूप छे), के जेने सेववाथी उत्पन्न थयेलो ताप परलोकमां पण शांत थतो नथी. ॥ ६३ ॥

स्त्रियां विषतनौ दक्षा लक्षणावैपरीत्यतः । सुधाकराद्यैरौपम्यं ददुस्तन्न जडा विदुः ॥ ६४ ॥

अन्वयः-दक्षाः लक्षणा वैपरीत्यतः विषतनौ स्त्रियां सुधाकराद्यैः औपम्यं ददुः, तत् जडाः न विदुः. ॥ ६४ ॥

अर्थः-कविओए तो विपरीत संबंधरूपे झेरी शरीरवाळी स्त्रीने (पण) चंद्रआदिकनी उपमाओथी अलंकृत करेली छे, ते हकीकतने अज्ञानी मूर्खो जाणी शक्या नथी. ॥ ६४ ॥

विश्वासघातिनां मौलिरत्नं जानामि योषितः । नरकाब्धौ नरं प्रेम्णा परिरभ्य क्षिपन्ति याः ॥ ६५ ॥

अन्वयः-जानामि, योषितः विश्वासघातिनां मौलिरत्नं, याः नरं प्रेम्णा परिरभ्य नरक अब्धौ क्षिपंति. ॥ ६५ ॥

अर्थः-हुं एम जाणुं छुं के, स्त्रीओ विश्वासघात करनाराओमां शिरोमणिसरखी छे, के जेओ पुरुषने प्रेमथी वळगी पडीने नरकरूपी महासागरमां फेंकी दे छे. ॥ ६५ ॥

अबला इति न स्त्रीभिः कर्तव्यं हस्तमेलनम् । हरन्ति जीवितं पुंसां संशये च क्षिपन्ति याः ॥ ६६ ॥

अन्वयः—"अबला" इति स्त्रीभिः हस्तमेलनं न कर्तव्यं, याः पुंसां जीवितं हरंति, च संशये क्षिपंति. ॥ ६६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अर्थः—आ "अबला" (निर्बल छे) एम धारीने स्त्रीओनी साथे हस्तमेळाप करवो नही, केमके तेओ पुरुषोनां जीवितने (वीर्यने) हरे छे, तथा तेओने (प्राणसंबंधि) संशयमां नाखे छे. ॥ ६६ ॥

इयं हि मम रक्तस्य प्रतीचीव विवस्वतः । मानम्लानिं ददौ कां तु गतिं दातेति वेत्ति कः ॥ ६७ ॥

अन्वयः—विवस्वतः प्रतीची इव हि इयं रक्तस्य मम मानम्लानिं ददौ, गतिं तु कां दाता? इति कः वेत्ति? ॥ ६७ ॥

अर्थः-सूर्यने जेम पश्चिम दिशाए, तेम खरेखर आ राणीए आसक्त (पक्षे—लाल रंगना) एवा मने मानहानि आपी छे, अने (हजु) गति तो केवी आपशे? ते कोण जाणी शके एम छे? ॥ ६७ ॥

धिग्मामेतद्वशित्वेन शिवोदयनिरादरम् । घूकनेत्रमिव ध्वान्तमित्रत्वेनार्कनिःस्पृहम् ॥ ६८ ॥

अन्वयः—ध्वांत मित्रत्वेन अर्क निःस्पृहं घूकनेत्रं इव, एतद्वशित्वेन शिव उदय निरादरं मां धिक् ॥ ६८ ॥

अर्थः—अंधकारनी मित्राइथी सूर्यनी इच्छा नही राखनारा घूवडना नेत्रनी पेठे, आ राणीने वश थइ मोक्षप्राप्तिमाटे बेदरकार रहेला एवा मने धिक्कार छे. ॥ ६८ ॥

एतद्वैराग्यतो नैतद्वैरं मुञ्चेऽधुना पुनः । कुलस्यापि कलङ्कः स्यादपमानो हि मानिनाम् ॥ ६९ ॥

अन्वयः—पुनः एतद् वैराग्यतः अधुना एतद्वैरं न मुंचे, हि अपमानतः मानिनां कुलस्य अपि कलंकः स्यात् ॥ ६९ ॥

अर्थः—परंतु आवीरीतना वैराग्यथी हमणा तो आ वैरने छोडीश नही, केमके अपमान (सहन करवाथी) मानी माणसोना



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुलने कलंक लागे छे. ॥ ६९ ॥

यः प्रदत्ते हृदि पदं तमूर्ध्वं गिलति क्षणात् । अपमानेऽप्यनुद्योगी पङ्कादप्यधमः पुमान् ॥ ७० ॥

अन्वयः—अपमाने अपि अनुद्योगी पुमान् पंकात् अपि अधमः, यः हृदि पदं दत्ते तं ऊर्ध्वं क्षणात् गिलति. ॥ ७० ॥

अर्थः-अपमान थयां छतां पण जे माणस तेनुं वेर लेवामाटे उद्यम नथी करतो, तेने कादवथी पण अधम (जाणवो), केमके जे कोइ तेनाहृदयपर पग मूके छे, तेवा उंचा माणसने पण (ते कादव) क्षणवारमां गळी जाय छे. ॥ ७० ॥

क्षुद्रोप्युपद्रवं कुर्यान्निःकाममपमानितः । विदधुर्मधुहर्तारं विधुरं मधुमक्षिकाः ॥ ७१ ॥

अन्वयः—निःकामं अपमानितः क्षुद्रः अपि उपद्रवं कुर्यात्, मधुमक्षिकाः मधुहर्तारविधुरं विदधुः ॥ ७१ ॥

अर्थः—नाहक अपमान पामेलो क्षुद्र प्राणी पण ( अपमान करनारने ) हेरान करे छे, केमके मधमाखो ( पण पोतानुं ) मध लेनारने व्याकुल करे छे. ॥ ७१ ॥

गृह्णन्तं रससर्वस्वं भास्वन्तं प्रत्यपक्रियाम् । कांचित्कर्तुमशक्तस्य पङ्कस्यापि स्फुटत्युरः ॥ ७२ ॥

अन्वयः—रस सर्वस्वं गृह्णांतं भास्वंतंप्रति कांचित् अपक्रियां कर्तुं अशक्तस्य पंकस्य अपि उरः स्फुटति. ॥ ७२ ॥

अर्थः-( पोतानां ) तमाम रसने चूसी लेता एवा सूर्यप्रतेनुं कंइ पण वेर वसुल न करी शकता एवा कादवनुं हृदय पण चीराइ जाय छे. ॥ ७२ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दूरे त्यजति मातापि परावज्ञासहं नरम् । क्षमम्प्यक्षमैर्बद्धं गजं विन्ध्याटवी यथा ॥ ७३ ॥

अन्वयः–क्षमं अपि अक्षमैः बद्धं गजं यथा विंध्याटवी, (तथा) पर अवज्ञा सहं नरं माता अपि दूरे त्यजति. ॥ ७३ ॥

अर्थः–समर्थ छतां पण असमर्थोए (मनुष्योए) बांधेला हाथीने जेम विंध्याचलनी अटवी (तजी दे छे, तेम ) परनु अपमान सहन करनारा पुरुषने ( तेनी ) माता पण दूर तजी दे छे. ॥ ७३ ॥

तदेतस्यापमानाब्धेः पारं गत्वासिनौकया । संसारार्णवपाराय भजिष्ये पोतवद्व्रतम् ॥ ७४ ॥

अन्वयः—तत् असि नौकया एतस्य अपमान अब्धेः पारं गत्वा संसार अर्णव पाराय पोतवत् व्रतं भजिष्ये. ॥ ७४ ॥

अर्थः–माटे खड्गरूपी वहाणथी आ अपमानरूपी समुद्रनो पार पाम्याबाद, संसाररूपी समुद्रनो पार पामवामाटे ( हुं ) नावसरखां चारित्रनो स्वीकार करीश. ॥ ७४ ॥

अपमानेऽपि चेद् गृह्णे व्रतं तन्मे निदर्शनात् । मत्पूर्वेषामपि भवत्येषा संभावना व्रते ॥ ७५ ॥

अन्वयः—चेत् अपमाने अपि व्रतं गृह्णे, तत् मे निदर्शनात् मत्पूर्वेषां अपि व्रते एषा संभावना भवति. ॥ ७५ ॥

अर्थः—कदाच अपमान थया छतां पण जो हुं चारित्र लेउं, तो मारा दाखलाथी मारा पूर्वजोनां चारित्रमाटे पण ( लोकोमां ) एवीरीतनीज संभावना थाय. ॥ ७५ ॥

यावदित्युद्धतध्यानस्त्यानचित्तोऽस्मि युद्धधीः । सैन्यसर्वाभिसारेण मन्मन्त्री तावदागमत् ॥ ७६ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्वयः—इति उद्धत ध्यान स्त्यान चित्तः यावत् युद्धधीः अस्मि, तावत् मन्मंत्री सैन्य सर्व अभिसारेण आगमत्. ॥७६॥

अर्थः—एवी रीतना उद्धत विचारोमां चोटेलां मनवाळो (हुं) जेवामां युद्धमाटे चिंतवन करुं छुं, तेवामां मारो मंत्री सैन्यनी सर्व सामग्रीसहित (त्यां) आवी पहोंच्यो. ॥ ७६ ॥

ततोऽन्तरस्फुरद्दूताविर्भूताद्भुतवैरयोः । मम तस्य च सेनाभिः समरः समवर्तत ॥ ७७॥

अन्वयः—ततः अंतर स्फुरत् दूत आविर्भूत अद्भुत वैरयोः मम च तस्य सेनाभिः समरः समवर्तत. ॥ ७७ ॥

अर्थः—पछी वच्चे जताआवता दूतोथी प्रगट थयेल छे घणुं वैर जेओने, एवां मारां अने ते पुरुषनां सैन्योवच्चे युद्ध थवा मांडयुं.

मिथो रथो रथं नागं नागोऽश्वोऽश्वं भटं भटः । समियाय समीकाय स्वकायव्ययनिर्भयः ॥ ७८ ॥

अन्वयः—स्वकाय व्यय निर्भयः रथं रथः, नागं नागः, अश्वं अश्वः, भटं भटः मिथः समीकाय समियाय. ॥ ७८ ॥

अर्थः-(पछी) पोतानां शरीरना विनाशनो भय राख्याविनाज रथसामे रथ, हाथी सामे हाथी, घोडासामे घोडो, अने सुभट-सामे सुभट, एम परस्पर युद्ध करवामाटे गोठवाइ गया. ॥ ७८ ॥

समनम्यत कोदण्डैः खड्गदण्डैरकम्प्यत । तत्र रौद्रे रणोद्रेके न तु शौर्योद्भटैर्भटैः ॥ ७९ ॥

अन्वयः-तत्र रौद्रे रण उद्रेके कोदंडैः समनम्यत, खड्गदंडैः अकंप्यत, तु शौर्य उद्भटैः भटैः न. ॥ ७९ ॥

अर्थः-ते भयंकर रणसंग्राम होते छते धनुष्यो नमवा लाग्यां, तथा तलवारो कंपवा (चमकवा) लागी, परंतु शौर्यना आवेशवाळा



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुभटो नम्या के कंप्या नही. ७९ ॥

वपुषो निखिलस्यापि शक्त्या मुष्टिप्रविष्टया । दृढयन्तः प्रहरणान्यहितान्प्राहरन्भटाः ॥ ८० ॥

अन्वयः—निखिलस्य अपि वपुषः मुष्टि प्रविष्टया शक्त्या प्रहरणानि दृढयंतः भटाः अहितान् प्राहरन्. ॥ ८० ॥

अर्थः—आखांये शरीरनी मुठीमां आवेली शक्तिवडे हथीयारोने मजबूत पकडीने सुभटो शत्रुओने प्रहार करवा लाग्या. ॥८०॥

तादृग्युद्धश्रिया धन्यंमन्यो मन्योर्वशं गतः । प्रहारेषु लगत्स्वङ्गं भटः कण्टकितं दधौ ॥ ८१ ॥

अन्वयः—तादृग् युद्ध श्रिया धन्यंमन्यः, मन्योः वशं गतः सुभटः प्रहारे लगत्सु कंटकितं अंगं दधौ. ॥ ८१ ॥

अर्थः–तेवा प्रकारनी युद्धलक्ष्मीथी ( पोताने ) भाग्यशाली मानतो, तथा क्रोधने वश थयेलो सुभट ( शस्त्रोना ) प्रहारो लागतां रोमांचित शरीरने धारण करवा लाग्यो. ॥ ८१ ॥

विलुठत्तुरगव्रातं पतन्मातङ्गमण्डलम् । त्रुटच्छकटसंधानबन्धं नृत्यत्कबन्धकम् ॥ ८२ ॥

लोलत्कीलालकल्लोलमालिनीमण्डलं ततः । पक्षद्वयक्षयकरं प्रावर्धत रणक्षणम् ॥ ८३ ॥ युग्मम् ॥

अन्वयः—ततः विलुठत् तुरग व्रातं, पतत् मातंग मंडलं, त्रुटत् शकट संधान बंधं, नृत्यत् कबंधकं, ॥८२॥ लोलत् कीलाल कल्लोल मालिनी मंडलं, पक्ष द्वय क्षय करं रणक्षणं प्रावर्धत. ॥ ८३ ॥

अर्थः—पछी ( त्यां घोडाओना समूहो ( घायल थइ ) लोटवा लाग्या, हाथीओनां टोळां पडवा लाग्यां, साल, बंधनो विगेरे



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तुटी जवाथी रथोना चूरेचुरा थवा लाग्या, धडो नाचवा लाग्यां, ॥ ८२ ॥ अने रुधिरनीन दीओ चालवा लागी, एवी रीते बन्ने पक्षोनो विनाश करनारो रणसंग्रामनो महोत्सव वृद्धि पामवा लाग्यो. ॥ ८३ ॥ युग्मं. ॥

भ्राजिष्णुभूरितेजस्कैः क्रमान्मत्पृतनाः परैः । कर्शयामासिरे ग्रीष्मवासरैरिव रात्रयः ॥ ८४ ॥

अन्वयः-क्रमात् भ्राजिष्णु भूरि तेजस्कैः परैः ग्रीष्मवासरैः रात्रयः इव मत्पृतनाः कर्शयामासिरे. ॥ ८४ ॥

अर्थः-अनुक्रमे घणा चळकता तेजवाळा एवा ते शत्रुओए, उनाळाना (लांबा) दिवसो जेम रात्रिओने ( टुंकी करे ) तेम मारी सेनाओने टुंकी करी नाखी. ॥ ८४ ॥

राजवाह्यमथारुह्य जवादिभविभुं विभीः । अहं तेन सह क्रुद्धो द्वन्द्वयुद्धोत्सुकोऽमिलम् ॥ ८५ ॥

अन्वयः—अथ जवात् राजवाह्यं इभविभुं आरुह्य, विभीः क्रुद्धः अहं द्वंद्व युद्ध उत्सुकः तेन सह अमिलं. ॥ ८५ ॥

अर्थः—पछी एकदम राजाने चडवाना पट्टहस्तीपर चडीने, निर्भय थइने, तथा क्रोध पामीने हुं द्वंद्वयुद्ध करवामाटे उत्कंठित थइ तेनी साथे मळ्यो. ॥ ८५ ॥

मयि मुञ्चति नाराचवीचीर्दक्षेण रक्षितः । तेनात्मा च गजेन्द्रश्च तलवर्गश्च मार्गणैः ॥ ८६ ॥

अन्वयः-मयि नाराचवीचीः मुंचति, तेन दक्षेण मार्गणैः आत्मा च गजेंद्रः च तलवर्गः च रक्षितः. ॥ ८६ ॥

अर्थः-हुं ( ज्यारे ते शत्रुतरफ ) बाणोनी श्रेणिओ छोडवा लाग्यो, त्यारे ते चतुर शत्रुए ( पोते छोडेलां ) बाणोवडे (पोताना)



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आत्मानुं, हस्तिराजनुं, तथा नीचे रहेला सैन्यसमूहनुं अथवा बख्तरनुं रक्षण कर्युं. (तलवर्ग एटले धनुर्धरोनुं चामडां तुंबखतर)

स तु निर्नाशयामास मार्गणानां गणैः क्षणात् । मद्बलं सकलं भानुर्भचक्रमिव भानुभिः ॥ ८७ ॥

अन्वयः—भानुः भानुभिः भचक्रं इव, सः तु मार्गणानां गणैः सकलं मद्बलं क्षणात् निर्नाशयामास. ॥ ८७ ॥

अर्थः-(पछी) सूर्य (पोतानां) किरणोवडे जेम ताराओना समूहनो (नाश करे छे) तेम तेणे तो बाणोना समूहोवडे मारां सर्व सैन्यनो क्षणवारमां विनाश करी नाख्यो. ॥ ८७ ॥

यद्यदस्त्रं मयामोचि तत्तदेष क्षणादपि । छेकश्चिच्छेद सद्यस्कं भवत्कर्मेव केवली ॥ ८८ ॥

अन्वयः-मया यत् यत् अस्त्रं अमोचि, तत् तत् छेकः एषः, केवली सद्यस्कं भवत्कर्म इव क्षणात् अपि चिच्छेद. ॥ ८८ ॥

अर्थः-में जे जे शस्त्र फेंक्युं, ते ते शस्त्रने ते चालाक शत्रुए, केवली जेम तुरत भवोपग्राही कर्मने छेदे, तेम क्षणवारमां छेदी नाख्युं. ॥ ८८ ॥

पतत्यथ तदस्त्रार्ते गजे क्षीणाखिलायुधः । अस्त्रयन्मुष्टिमुत्प्लुत्यागमं तदिभमूर्धनि ॥ ८९ ॥

अन्वयः-अथ तत् अस्त्र आर्ते गजे पतति, क्षीण अखिल आयुधः, मुष्टिं अस्त्रयन् उत्प्लुत्य तत् इभ मूर्धनि आगमं ॥८९॥

अर्थः—पछी तेना शस्त्रोनी वेदनाथी (मारो) हाथी पड्याबाद, सर्व शस्त्रो खलास थइ जवाथी, मूठीने शस्त्ररूप करी, उछळीने (हुं) तेना हाथीना मस्तकपर आव्यो. ॥ ८९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धृत्वाथ हस्तयोस्तेन क्षिपन्पादाहतीरहम् । उत्क्षिप्तः पतितो दूरे यन्त्रोत्थग्रावगोलवत् ॥ ९० ॥

अन्वयः-अथ पाद आहतीः क्षिपन् अहं तेन हस्तयोः धृत्वा उत्क्षिप्तः, यंत्र उत्थ ग्राव गोलवत् दूरे पतितः ॥ ९० ॥

अर्थः-पछी लातो मारता एवा मने ते शत्रुए बे हाथे पकडीने उंचे उछाळ्यो, ( अने तेथी ) गोफणमांथी उछाळेला पत्थरना गोळानीपेठे हुं दूर जइ पड्यो. ॥ ९० ॥

सहसा सह सेनाभिः प्राविशन्मत्पुरं स तत् । तन्वन्साकं तयोत्तालहस्ततालः कथा मिथः ॥ ९१ ॥

अन्वयः-तया साकं उत्ताल हस्त तालः मिथः कथाः तन्वन् सः सहसा सेनाभिः सह तत् मत्पुरं प्राविशत्. ॥ ९१ ॥

अर्थः-(पछी मारी) ते राणीनी साथे म्होटा अवाजथी हाथवडे ताडीओ देइ परस्पर वातो करतो ते शत्रु एकदम (पोताना) सैन्यसहित मारां ते नगरमां दाखल थयो. ॥ ९१ ॥

एवमालोकमानोऽहमपमानोच्चयाकुलः । इष्टमिष्टतमेभ्योऽपि गणयन्मरणं तदा ॥ ९२ ॥

यद्यस्ति सुकृतं किंचिन्मम तत्तन्निदानतः । मा भूद्भवान्तरेऽपि स्त्रीसङ्गः सत्पथभङ्गकृत् ॥ ९३ ॥

इत्यालपन्पुरः प्रेक्ष्य कूपं तत्र पपात च । सभान्तर्भद्रपीठस्थं स्वं ददर्श च पूर्ववत् ॥ ९४ ॥

अन्वयः—तदा एवं आलोकमानः, अपमान उच्चय आकुलः अहं मरणं इष्टतमेभ्यः अपि इष्टं गणयन्, ॥ ९२ ॥ यदि मम



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





किंचित् सुकृतं अस्ति, तत् तन्निदानतः भवांतरे अपि सत्पथ भंगकृत् स्त्रीसंगः माभूत्, ॥ ९३ ॥ इति आलपन् च पुरः कूपं प्रेक्ष्य तत्र पपात, च स्वं पूर्ववत् सभांतः भद्रपीठस्थं ददर्श. ॥ ९४ ॥ त्रिभिर्विशेषकं ॥

अर्थः—ते समये आवी रीते जोतो, तथा अपमानना समूहथी व्याकुल थयेलो हुं मृत्युने व्हालामां व्हालुं गणतोथको, ॥९२॥ जो मारुं (हजु) कंइक पुण्य (बाकी) होय, तो तेना नियाणाथी भवांतरमां पण, उत्तम मार्गनो विनाश करनारो स्त्रीसंग ( मने ) न थजो, ॥ ९३ ॥ एम बोलतो थको आगळना भागमां कुवाने जोइ तेमां पड्यो, परंतु (हुं) पोताने पूर्वनीपेठेज राजसभानी अंदर सिंहासनपर बेठेलो जोवा लाग्यो. ॥ ९४ ॥ त्रिभिर्विशेषकं ॥

ये युधि क्रुधि दुर्धर्षाः क्षताः प्रपतिता मृताः । तानक्षतानहं संसद्यपश्यं पार्श्वतो भटान् ॥ ९५ ॥

अन्वयः—क्रुधि दुर्धर्षाः ये युधि क्षताः, प्रपतिताः, मृताः तान् भटान् अहं संसदि पार्श्वतः अक्षतान् अपश्यं. ९५ ॥

अर्थः—क्रोधने लीधे न पकडी शकाय एवा जे सुभटो युद्धमां घायल थया हता, मूर्छित थया हता, तथा मरण पाम्या हता, ते सुभटोने हुं सभामां चोतरफ अक्षत शरीरवाळा (जीवता) जोवा लाग्यो. ॥ ९५ ॥

ये दृष्टाः संगरे पिष्टास्तेषामशृणवं रवम् । हस्तिनां हस्तिशालासु वाजिशालासु वाजिनाम् ॥ ९६ ॥

अन्वयः—ये संगरे पिष्टाः दृष्टाः, तेषां हस्तिनां हस्तिशालासु, वाजिनां वाजिशालासु रवं अशृणवं. ॥ ९६ ॥

अर्थः—जेओने रणसंग्राममां में नाश पामेला जोया हता, ते हाथीओना हस्तिशालाओमां, तथा ते घोडाओना घोडाशालोमां

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



(थता) शब्दोने हुं सांभळवा लाग्यो. ॥ ९६ ॥

अन्तरन्तःपुरं यावत्क्षिप्ता दृक्तावदैक्ष्यत । तदालिमाला तादृक्तत्प्रतिकर्मक्रियोन्मुखी ॥ ९७ ॥

अन्वयः—यावत् अंतः अंतःपुरं दृक् क्षिप्ता, तावत् तादृक् तत् प्रतिकर्म क्रिया उन्मुखी तत् आलिमाला ऐक्ष्यत. ॥ ९७ ॥

अर्थः—( पछी ) जेवामां में अंतेउर तरफ नजर करी, तेवामां तेवी तेज राणीनी आसनावासनानी क्रिया करती एवी तेणीनी सखीओनी श्रेणि मारा जोवामां आवी. ॥ ९७ ॥

इत्यद्भुतधुतस्वान्ते मयि कान्तेन तेजसा । अर्कं कर्करयन्कश्चिदाविरासीत्पुरः सुरः ॥ ९८ ॥

अन्वयः—इति अद्भुत धुत स्वांते मयि, कांतेन तेजसा अर्कं कर्करयन् कश्चित् सुरः पुरः आविरासीत्. ॥ ९८ ॥

अर्थः—एवी रीतना आश्चर्यमां मारुं हृदय व्याकुल थतां, मनोहर तेजथी सूर्यने पण कांकरासरखो करतो कोइक देव मारी आगळ प्रगट थयो. ॥ ९८ ॥

तद्विलोकादहं जातजातिस्मृतिरचिन्तयम् । प्राग्जातौ धनधन्याख्यौ सुहृदावहमेष च ॥ ९९ ॥

अन्वयः—तद्विलोकात् जात जाति स्मृतिः अहं अचर्तियं, प्राग् जातौ अहं च एषः धन धन्याख्यौ सुहृदौ. ॥ ९९ ॥

अर्थः—तेने जोवाथी थयेल छे जातिस्मरण ज्ञान जेने, एवो हुं विचारवा लाग्यो के, पूर्वभवमां हुं अने आ देव धन अने धन्यनामना मित्रो हता. ॥ ९९ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनेन सह संसारनिःसारत्वविचारवान् । व्रतान्निरर्गलस्वर्गलक्ष्मीभोगमुपार्जयम् ॥ १०० ॥

अन्वयः—अनेन सह संसार निःसारत्व विचारवान् व्रतात् निरर्गल स्वर्ग लक्ष्मी भोगं उपार्जयं. ॥ १०० ॥

अर्थः—आ मित्रनीसाथे संसारना असारपणानो विचार करी चारित्र लेवाथी में अस्खलित स्वर्ग लक्ष्मीनुं सुख मेळव्युं हतुं १००

अभ्यर्थितोऽयमाश्लिष्य दिवः प्राक् च्यवता मया । उद्धर्तव्यस्त्वया सोऽहं भवे मोहार्णवादिति ॥१०१॥

अन्वयः—दिवः प्राक् च्यवता मया अयं आश्लिष्य इति अभ्यर्थितः, सः अहं भवे मोह अर्णवात् त्वया उद्धर्तव्यः. ॥ १०१ ॥

अर्थः—देवलोकमांथी प्रथम चवता एवा में आ मित्रने भेटीने एवी प्रार्थना करी हती के, मने आ संसारमाना मोहरूपी महासागरमांथी तारे ओधरवो. ॥ १०१ ॥

तन्नूनममुनैवाहं घटयित्वेति नाटकम् । बोधितो बोधदुग्धानामन्धुना बन्धुनाधुना ॥ १०२ ॥

अन्वयः—तत् नूनं अधुना बोध दुग्धानां अंधुना अमुना बंधुना एव इति नाटकं घटयित्वा अहं बोधितः. ॥ १०२ ॥

अर्थः—माटे खरेखर हमणा ज्ञानरूपी दूधना कुवा सरखा एवा आ बंधुएज आवा प्रकारनुं नाटक भजवीने मने बोध पमाड्यो छे.

इत्युत्थाय मया प्रीत्या सत्कृतः स तिरोऽभवत् । अहं च प्राव्रजं मङ्क्षु भवारण्यं विलङ्घितुम् ॥ १०३ ॥

अन्वयः—इति उत्थाय मया प्रीत्या सत्कृतः सः तिरोऽभवत्, च अहं भव अरण्यं विलंघितुं मंक्षु प्राव्रजं. ॥ १०३ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अर्थः—एम विचारी उठीने में आनंदथी सत्कार कर्याबाद ते देव अदृश्य थयो, अने में आ संसाररूपी अटवीने ओळंगी जवा माटे तुरत चारित्र ग्रहण कर्युं. ॥ ४७८ ॥

॥ इति श्रीस्त्रीविषयपरित्यागोपदर्शने चंद्रयशोनृप चरित्रं समाप्तं. आ चरित्र श्रीवर्धमानसूरि-विरचित श्रीवासुपूज्यचरित्रनामना महाकाव्यमांथी स्वपरना श्रेय माटे तेना अन्वय तथा गुजराती भाषांतर सहित जामनगर निवासी पंडित श्रावक हीरालाल हंसराजे पोताना श्रीजैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्युं छे. ॥ श्रीरस्तु ॥

॥ समाप्तोऽयं ग्रंथः गुरुश्रीमच्चारित्रविजय सुप्रसादात् ॥ श्रीरस्तु ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इति श्रीचंद्रयशः चरित्रं समाप्तम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only